प्रियशब्दादिसेवनादिकं। न चात्राहारस्य निषेधः। प्रातराशे त्वजीर्णे तु सायमाशो न दुष्यतीति वचनेन सायमाशस्यावश्यं कर्त्तव्यत्वात् ॥*॥ आमाजीर्णस्य लक्षणमाह,—

"तत्रामे गुरुतोत्क्लेशः शोथो गण्डाक्षिकूटगः।
उद्गारश्च यथाभुक्तमविदग्धः प्रवर्त्तते" ॥

गुरुता उदराङ्गयोः। उत्क्लेशः उपस्थितं वमनमिव। अक्षिकूटोऽक्षिपुटकः। अविदग्धः अनम्लो निर्गन्धश्च ॥*॥ विदग्धाजीर्णस्य लक्षणमाह,—

"विदग्धे भ्रमतृण्मूर्च्छाः पित्ताच्च विविधा रुजः।
उद्गारश्च सधूमाम्लः स्वेदो दाहश्च जायते" ॥

विविधा रुजः शोषचोषदाहादयः ॥*॥ विष्टब्धाजीर्णस्य लक्षणमाह,—

"विष्टब्धे शूलमाध्मानं विविधा वातवेदनाः।
मलवाताप्रवृत्तिश्च स्तम्भो मोहोऽङ्गपीड़नं" ॥

वातवेदनाः तोदभेदादयः ॥ स्तम्भो गात्राणां। मोहो मूर्च्छा ॥ * ॥ रसशेषाजीर्णस्य लक्षणमाह,

"रसशेषेऽन्नविद्वेषो हृदयाशुद्धिगौरवे" ॥ * ॥

एतस्य उपद्रवानाह,—

"मूर्च्छा प्रलापो वमथुः प्रसेकः सादनं भ्रमः।
उपद्रवा भवन्त्येते मृतिश्च रसशेषतः" ॥ * ॥

अतिशयितेभ्यः आमाद्यजीर्णेभ्यो विसूच्यादिरोगानाह,—

"आमं विदग्धं विष्टब्धमित्यजीर्णं यदीरितं।
विसूच्यलसकौ तस्माद्भवेच्चापि विलम्बिका" ॥

नात्र यथासङ्ख्यं तदा विष्टब्धाद्विलम्बिका भवितुमर्हति। सा च कफवाताभ्यां भवतीत्येकैकतोऽजीर्णाद्विसूच्यादित्रयोत्पत्तिः ॥ * ॥ विसूच्यादिनिरुक्तिमाह,—

"सूचीभिरिव गात्राणि तदुत्सन्तिष्ठतेऽनिलः।
यत्राजीर्णेन सा वैद्यैर्व्विसूचीति निगद्यते" ॥*॥

विसूच्या निदानमाह,—

"न तां परिमिताहारा लभन्ते विदितागमाः।
मूढ़ास्तामजितात्मानो लभन्तेऽशनलोलुपाः" ॥

विदितागमाः ज्ञातायूर्व्वेदाः ॥*॥ विसूच्या लक्षणमाह,—

"मूर्च्छातिसारौ वमथुः पिपासा
शूलं भ्रमोद्वेष्टनजृम्भदाहाः।
वैवर्ण्यकम्पौ हृदये रुजश्च
भवन्ति तस्यां शिरसश्च भेदः" ॥

उद्वेष्टनं हस्तपादयोः। शिरसो भेदः शिरःशूलं ॥ विसूच्या उपद्रवानाह,—

"निद्रानाशोऽरतिः कम्पो मूत्राघातो विसंज्ञता।
अमी उपद्रवा घोरा विसूच्याः पञ्च दारुणाः" ॥

अमी उपद्रवा घोरा अमी निद्रानाशादयः उपद्रवाः सर्व्वेषामेव रोगाणां घोरा भयङ्कराः। विसूच्याः पञ्च दारुणा विसूच्यास्तु पञ्चापि यदि स्युस्तदा दारुणाः प्राणभयङ्कराः ॥ * ॥ अलसकलक्षणमाह,—

"कुक्षिरानह्यतेऽत्यर्थं प्रताम्येत् परिकूजति।
निरुद्धो मारुतश्चैव कुक्षावुपरि धावति ॥
वातवर्चो निरोधश्च यस्यात्यर्थं भवेदपि।
तस्यालसकमाचष्टे तृष्णोद्गारौ च यस्य तु" ॥

आनह्यते आध्मायते। प्रताम्येत् ग्लायति। परिकूजति आर्त्तनादं करोति। कुक्षौ अजीर्णेन निरुद्धो मारुतः उपरि धावति हृदयकण्ठादिकं गच्छतीत्यर्थः। काश्यपस्त्वाह,—

"नाधो याति न चाप्युर्द्ध्वमाहारो न च पच्यते।
कोष्ठे स्थितोऽलसीभूतस्ततोऽसावलसः स्मृतः" ॥

विसूच्यलसयोररिष्टमाह,—

"यः श्यावदन्तौष्ठनखोऽल्पसंज्ञः
छर्द्यर्द्दितोऽभ्यन्तरयातनेत्रः।
क्षामस्वरः सर्व्वविमुक्तसन्धि-
र्यायान्नरः सोऽपुनरागमाय" ॥

सर्व्वविमुक्तसन्धिः सर्व्वे विमुक्ताः शिथिलीभूताः सन्धयो यस्य सः ॥ * ॥ विलम्बिकाया लक्षणमाह,—

"दुष्टञ्च भुक्तं कफमारुताभ्यां
प्रवर्त्तते नोर्द्ध्वमधश्च यत्र।
विलम्बिकां तां भृशदुश्चिकित्सा-
माचक्षते शास्त्रविदः पुराणाः" ॥

भृशदुश्चिकित्स्यां प्रत्याख्यायोपचरणीयम्। इयमसाध्यैवेति जेज्जटः ॥ * ॥ जीर्णस्याहारस्य लक्षणमाह,—

"उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितं।
लघुता क्षुत्पिपासे च जीर्णाहारस्य लक्षणं" ॥*॥

अथ चिकित्सा,—

"हरीतकी तथा शुण्ठी भक्ष्यमाणा गुड़ेन वा।
सैन्धवेन युता वा स्यात् सातत्येनाग्निदीपनी ॥
गुड़ेन शुण्ठीमथवोपकुल्यां
पथ्यां तृतीयामथ दाड़िमं वा।
आमेष्वजीर्णेषु गुदामयेषु
वर्च्चो विवन्धेषु च नित्यमद्यात्॥
व्योषं दन्ती त्रिवृच्चित्रं कृष्णामूलं विचूर्णितं।
तच्चूर्णं गुड़संमिश्रं भक्षयेत् प्रातरुत्थितः ॥
एतद्गुड़ाष्टकं नाम बलवर्णाग्निवर्द्धनं।
शोथोदावर्त्तशूलघ्नं प्लीहपाण्ड्वामयापहं ॥

सर्व्वचूर्णसमो गुड़ो देयः। केचित्तु द्विगुणं गुड़ं दत्त्वा गुटिकां कुर्व्वन्ति। रेचकोऽयं योगः। गुड़ाष्टकम् ॥ * ॥ दहनाजमोदसैन्धवनागरमरिचानि चास्तवक्रेण। सप्ताहादधिकरं पाण्डुरोगनाशनं परमं ॥ औषधमित्यध्याहार्य्यं,—

"तत्रामे वमनं कार्य्यं विदग्धे लङ्घनं हितं।
विष्टब्धे स्वेदनं शस्तं रसशेषे शयीत च ॥
वचा लवणतोयेन वान्तिरामे प्रशस्यते ॥
कणासिन्धुवचाकल्कं पीत्वा वा शिशिराम्भसा ॥

जलमत्र सरावमात्रं। वचा कर्षार्द्धमिता। सैन्धवं कर्षार्द्धमितं। द्वयोश्चूर्णयुतेन जलेन पीतेन। "कणादिकल्कं वा पीत्वा वान्तिरामे प्रशस्यते" इत्यनेनान्वयः ॥ * ॥

"धान्यनागरसिद्धं वा तोयं दद्याद्विचक्षणः।
आमाजीर्णप्रशमनं शूलघ्नं वस्तिशोधनं ॥
भवेद् यदि प्रातरजीर्णशङ्का
तदाभयां नागरसैन्धवाभ्यां।
विचूर्णितां शीतजलेन भुक्त्वा
भुञ्जीत भुक्तामशङ्को मितमन्नकाले ॥
विदह्यते यस्य तु भुक्तमात्रं
दंदह्यते हृच्च गलश्च यस्य।
द्राक्षां सितामाक्षिकसम्प्रयुक्तां
लिह्याभयां चातिसुखं लभेत ॥
त्रिकटुकमजमोदा सैन्धवं जीरके द्वे
समधरणधृतानामष्टमो हिङ्गुभागः।
प्रथमकवलभुक्तं सर्पिषा चूर्णमेत-
ज्जनयति जठरेऽग्निं वातरोगांश्च हन्ति" ॥

अजमोदात्र यवानी। अन्तःसंमार्ज्जकत्वात्। जीरके द्वे शुक्लं कृष्णञ्च। धरणमत्र मानं। तेन समधरणं धृतानां तुल्यमानं गृहीतानां शुण्ठ्यादीनां भागाः सप्त। तत्राष्टमो भागो हिङ्गुनः। हिङ्ग्वष्टकम् ॥ * ॥

"शुद्धं सूतं गन्धकञ्च पलमानं पृथक् पृथक्।
हरीतकी च द्विपला नागरस्त्रिपलः स्मृतः ॥
कृष्णा च मरिचं तद्वत् सिन्धूत्थं त्रिपलं मतं।
चतुष्पला च विजया मर्द्दयेन्निम्बुकद्रवैः ॥
पुटानि सप्त देयानि घर्म्ममध्ये पुनः पुनः।
अजीर्णारिरियं प्रोक्तः सद्यो दीपनपाचनः ॥
भक्षयेद्द्विगुणं भक्ष्यं पाचयेद्भेदयेदपि।

अजीर्णारिः ॥ * ॥

"द्वौ क्षारौ चित्रकं पाठा करञ्जं लवणानि च।
सूक्ष्मैलापत्रकं भार्गी कृमिघ्नं हिङ्गु पौष्करं॥
शटी दार्व्वी त्रिवृन्मुस्तं वचा चेन्द्रयवास्तथा।
वृक्षाम्लं जीरकं धात्री श्रेयसी चोपकुञ्चिका ॥
अम्लवेतसमम्लीका यवानी देवदारु च।
अभयातिविषा श्यामा हपुषारग्वधं समं ॥
तिलमुष्ककशिग्रूणां कोकिलाक्षपलाशयोः।
क्षाराणि लौहकिट्टञ्च तप्तं गोमूत्रसेचितं॥
सूक्ष्मचूर्णानि कृत्वा तु समभागानि कारयेत्।
मातुलुङ्गरसेनैतद्भावयेद्दिवसत्रयं ॥
दिनत्रयन्तु शुक्तेन तथार्द्रकरसेन च।
अत्यग्निकारकं चूर्णं प्रदीप्ताग्निसमप्रभं ॥
उपयुक्तं विधानेन नाशयत्यचिराद्गदान्।
अजीर्णमथ गुल्मांश्च प्लीहानं गुदजानि च॥
उदराण्यन्त्रवृद्धिञ्च अष्ठीलां वातशोणितं।
प्रणुदत्युल्वनान्दोषानष्टमग्निं प्रदीपयेत्॥

द्वौ क्षारौ स्वर्ज्जिका यवक्षारश्च। लवणानि पञ्च। वृक्षाम्लं विषाम्बिल इति लोके। श्रेयसी हरीतकी। उपकुञ्चिका मगरैला। अम्लवेतसाभावे चुक्रं दातव्यं। श्यामा सारड। मुष्ककः मोष इति लोके। कोकिलाक्षः कोइलषा इति लोके। वह्निमुखचूर्णं ॥ * ॥

"स्नुह्यर्कचित्रकैरण्डवरुणं सपुनर्णवं।
तिलापामार्गकदलीपलाशं तिन्तिडी तथा ॥
गृहीत्वा ज्वालयेदेतत् प्रस्थं भस्माखिलञ्च तत्।
जलाढके विपक्तव्यं यावत् पादावशेषितं ॥
सुप्रसन्नं विनिःस्राव्य लवणप्रस्थसंयुतं।
पक्वं निर्धूमकठिनं सूक्ष्मचूर्णीकृतं पुनः ॥
यवानीजीरकव्योषस्थूलजीरकहिङ्गुभिः।